**अब्दप** पु० अब्दं पाति पा—क । १वर्षाधिपे तदानयनप्रकारश्च सि०शि०दर्शितः यथा“अथोऽर्घस्त्रिधा कल्पयाताब्दवृन्दात् कराभ्यां, कृतैः, पावकैः, संगुणाच्च । भुजङ्गैरवाप्तं फलं स्याद्दिनाद्यं तदर्द्धान्वितं भास्करादब्दपः स्यात्” अत्रोपपत्तिः । एकस्मिन् रविवर्षे सावनाहाः प्राक् प्रतिपादिताः ३६५ । १५ । ३० । २२ । ३० एतदष्टभिः सवर्णितं कार्य्यम् । ततोऽनुपातः । यद्यष्टभिर्वर्षैरेतावद्दिनाद्यं तदा कल्पगतैः किमिति । फलं दिनाद्यम् । तदनष्टं संस्थाप्यम् । ततो गताब्दैर्युतं सदब्दपतिः स्यादिति यदुक्तं तद्युक्तम् । यतः पञ्चषष्ट्यधिकशतत्रये सप्तभिर्भक्ते एकोऽवशिष्यते । अत एकगुणाब्दसंख्या तस्मिन् दिनाद्ये निक्षिप्ता । तस्मिन् सप्ततष्टेऽर्काद्योऽब्दपतिः । यतो यस्मिन् वारेऽब्दादिः सोऽब्दपतिः स्यादित्युपपन्नम् । ताजिकोक्ते २ वर्षाधिपतौ च तदानयनप्रकारश्च जन्मलग्नपतिवर्षलग्नाधिपतिमुन्थहाधिपतित्रिराशिपतीनां दिवा सूर्य्याक्रान्तराशिपतेः रात्रौ चन्द्राक्रान्तराशिपतेश्चैषां पञ्चाधिकारिणां मध्ये द्वादशवर्गीबलेन पञ्चवर्गीबलेन वोपेतः लग्नदर्शी वर्षाधिपतिः । बलसाम्ये दृष्ट्यतिरेकात्, तत्रापि साम्ये दृष्ट्यभावे च मुथहेश्वरः वर्षाधिपः । “अब्दपबलस्य विचारणेत्थम्” नी०ता० । अब्दपत्यादयोऽप्यत्र ।

**अब्दसार** पु० अब्दस्य मुस्तायाः सारः मूलनिर्यासः । कर्पूरे तस्य मुस्तामूलसारजत्वात्तथात्वम् घनसारमेघसारादयोऽप्यत्र ।

**अब्दवाहन** पु० अब्दोमेघोवाहनमस्य । इन्द्रे ।

**अब्दिमान्** त्रि० अपां दानमब्दिः दा०बा० भावे कि ईत० ततः अस्त्यर्थे मतुप् । जलदानवति “अब्दिमानुदधिमान्” ऋ० ५,४२,१४, ‘अपांदानवान् मेघ’ इति भा० ।

**अब्दुर्ग** अद्भिर्वेष्टितं दुर्गं शा०त० । सर्वतोवेष्टितेनोदकेनोपलक्षिते दुर्गे (गड़) “धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च । नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्” मनुः ।

**अब्दैवत** त्रि० आपोदैवतान्यस्य । १जलदेवताके मन्त्रभेदे “उदित्यृचा वारुणेन तृचेनाब्दैवतेन च” मनुः“स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयम” इति या० । स च मन्त्रः “आपोहि ष्ठा मयोभुव” इत्यादिस्तृचात्मकः । य० ११,५०,५१,५२ । २जलदेवताके पूर्व्वाषाढानक्षत्रे च ।

**अब्धि** पु० आपो धीयन्तेऽस्मिन् धा—आधारे कि उप०स० । १सरोवरे २समुद्रे च स च जम्बूद्वीपपूर्व्वापरादिवर्त्तिता भेदेन चतुर्विधः यथोक्तं भागवते“तत्र चतुर्द्धा विभज्यमाना चतसृभिर्नामभिश्चतुर्दिशमभिस्पन्दन्ती नदनदीपतिमेवाभिनिविशति, सीतालकनन्दावङ्क्षुर्भद्रेति । सीता तु ब्रह्मसदनात् केशराचलादिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां दिशि क्षार समुद्रमभिप्रविशति । एवं माल्यवच्छिखरान्निष्पतन्ती तत उपरतवेगा केतुमालमभिवङ्क्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति । भद्रा चोत्तरतोमेरुशिखरतो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि लवणार्णवं प्रविशति । तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसरंहसा लुठन्ती भारतमभिवर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति” अत एव तत्संख्यातुल्यसंख्याकचतुःसंख्याबोधकताऽस्य । “पञ्च पञ्चयुगषट्कलोचनद्व्यब्धिषड्गुणमिता ६४२२६२५५ गुरोर्मता” । “खाष्टाब्धयो (४८०)ऽष्टाक्षगजेषुदिग्द्विपद्विपाब्धयः ४८८१०५८५८, इति च सि०शि० । सप्तद्वीपान्तरालस्थ लवणादिभेदात् सप्तविधोऽपि यथोक्तं सि०शि० “भूमेरर्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्य्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः । लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतममरभिक्षः श्रीश्च यस्मादभूव । महितचरणपद्मः पद्मजन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र । दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्यः । स्वादूदकान्तर्बडवानलोऽसौ पातालोकाः पृथिवीपुटानि” । तेषाञ्च द्वीपद्वयान्तरालस्थितिमूलम् अब्धिद्वीपाशब्दे दृश्यम् तेन तत्संख्यातुल्यसप्तसंख्यकोऽप्यस्य क्वचित् प्रवृत्तिः अतएव सप्तद्वीपेत्यर्थे अब्धिद्वीपेति प्रयुक्तम् । “चतुरः सप्त वाम्बुधीन्” वाग्भटालङ्कारः ।

**अब्धिकफ** पु० अब्धेः समुद्रस्य कफ इव । समुद्रफेने ।

**अब्धिज** ०० अब्धौ जायते जन—ड ७त० । १चन्द्रे २ शङ्खे ३ समुद्रजातमात्रे त्रि० ४लक्ष्म्यां स्त्री । ५अश्विनीकुमारयोः द्वि०व० । एतेषाञ्च समुद्रजातत्वात्तथात्वम् ।

**अब्धिद्वीपा** स्त्री अब्धिसंख्याता लवणादिसप्तसंख्याता द्वीपा अस्याः । जम्बूप्रभृतिसप्तद्वीपवत्याम् पृथिव्याम् । “शाकं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपुष्करे च । द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति” सि०शि० ।

**अब्धिनगरी** स्त्री अब्धौ तत्समीपे नगरी । द्वारकायां तस्याः समुद्रसन्निकृष्टत्वात् समुद्रोत्सृष्टभूमौ रचितत्वाच्च तथात्वम् यथा“इयं द्वारवती नाम पृथिव्यां निर्म्मिता मया भविष्यति